मॊदलिगॆ देवरपूजॆयन्नु माडबेकु. नंतर गौरी पूजॆ माडि, नंतर सिद्धिविनायकनन्नु पूजिसबेकु. देवर पूजॆगॆ उपयोगिसिद कलशद नीरन्ने उपयोगिसुवुदु सूक्त.

बेकाद सलकरणॆगळु –
सिद्धिविनायकन विग्रह । अरिशिन । कुंकुम । गॆज्जॆ वस्त्र । यज्ञोपवीत । हूवु । गंध (देवरिगॆ समर्पिसिद गंध) । अक्षता (देवरिगॆ समर्पिसिद्दु) । आभरणगळिद्दरॆ । अर्घ्यपात्रॆ । पंचपत्रॆ । उद्धरणॆ । नीरु । २१ रीतिय भक्ष्यगळु । अथवा कनिष्ठ २१ मोदक ।
चक्कुलि, इत्यादि. (गणेशन पूजॆगॆ तुळसियन्नु उपयोगिसबारदु)

"श्री सिद्धिविनायक व्रत पूजा विधान"

॥ भाद्रपदमास शुक्लपक्ष चतुर्थि ॥

श्री गुरुभ्यो नमः हरिः ओं ।
परमगुरुभ्यो नमः ।
श्रीमदानंदतीर्थभगवत्पादाचार्य गुरुभ्यो नमः ।
श्री वेदव्यासाय नमः ।

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये ।

घंटावादनं ।

आगमार्थं तु देवानां गमनार्थं तु रक्षसां ।
कुरु घंटारवं तत्र देवताह्वानलांछनं ।

(घंटानादं कुरु)

आचमन ।

केशवाय स्वाहा । नारायणाय स्वाहा । माधवाय स्वाह ।

गोविंदाय नमः । विष्णुवे नमः । मधुसूदनाय नमः । त्रिविक्रमाय नमः ।
वामनाय नमः । श्रीधराय नमः । हृषीकेशाय नमः । पद्मनाभाय नमः ।
दामोदराय नमः । संकर्षणाय नमः । वासुदेवाय नमः । प्रद्युम्नाय नमः ।
अनिरुद्धाय नमः । पुरुषोत्तमाय नमः । अधोक्षजाय नमः ।
नारसिंहाय नमः । अच्युताय नमः । जनार्धनाय नमः । उपेंद्राय नमः ।
हरये नमः । ओं श्री कृष्णाय नमः ।

**प्राणायामः**

प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता ।
देवी गायत्री छंदः । प्राणायामे विनियोगः ॥

ओं भूः । ओं भुवः । ओं स्वः । ओं महः । ओं जनः । ओं तपः । ओं सत्यं ।

ओं तत्सवितुर्वरेण्यं । भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।
ओमापो ज्योतीरसो_मृतं ब्रह्म भूर्भुवः स्वरों ॥

**संकल्प –**

शुभे शोभने मुहूर्ते विष्णोराज्ञया प्रवर्तमानस्य आद्यब्रह्मणः, द्वितीयपरार्धे,
श्रीश्वेतवराहकल्पे, वैवस्वत मन्वंतरे, अष्ठाविंशतितमे, कलियुगे, प्रथमपादे,
जंबूद्वीपे, भरतवर्षे, भरतखंडे, दंडकारण्ये, गोदावर्याः दक्षिणे तीरे, शालीवाहनशाके,
बौद्धावतारे, रामक्षेत्रे / परशुराम क्षेत्रे, अस्मिन्वर्तमाने, चांद्रमानेन, _____

संवत्सरे, दक्षिणायणे, वर्ष ऋतौ, भाद्रपाद मासे, शुक्ल पक्षे, चतुर्थ्यां, _____ वासरे, ________नक्षत्रे, ______योगे, ______ करणे, एवंगुण विशेषण विशिष्ठायां,, शुभतिथौ, अस्माकं सकुटुंबानां क्षेम, स्थैर्य, विजय, वीर्य, आयुः, आरोग्य, ऐश्वर्याभिवृद्ध्यर्थं, धर्म, अर्थ, काम, मोक्षाख्य, चतुर्विध पुरुषार्थ सिद्ध्यर्थं, स्त्रीपुत्र पौत्र, धन, विद्या, जय, कीर्त्या, आयुरारोग्यादि, अखिलाभीष्ठसिद्ध्यर्थं, सकल कार्येषु निर्विघ्नता सिद्धिद्वारा भगवदनुग्रहसिद्ध्यर्थं, श्री राघवेंद्रतीर्थ गुरुवंतर्गत, सिद्धिविनायकांतर्गत, भारतीरमण, हनुम–भीम–मध्वांतर्गत श्री विश्वंभरमूर्तिप्रेरणया, श्री विश्वंभरमूर्तिप्रीत्यर्थं, सिद्धिविनायकस्य ध्यानावाहनादि षोडशोपचार पूजां करिष्ये ॥
(मंत्राक्षते, हूवु, समेत नीरन्नु अर्घ्यपात्रॆगॆ बिडुवुदु)

**अथ कलशपूजा –**

कलशक्के नाल्कु दिक्कुगळल्लियू गंधाक्षतॆ हच्चि अदरॊळगॆ – बिडिहूगळन्नु हाकिकॊंडु कलशद मेलॆ बलगैयन्निट्टु कलशपूजॆ माडबेकु. आ कलशद नीरन्ने पूजॆगॆ उपयोगिसबेकु. पंचपात्रॆय नीरन्नु आचमनक्के मात्र उपयोगिसबेकु.

भगवत्पूजांगत्वेन कलशाराधनं करिष्ये ।

इति संकल्प्य, कलशं गंधाक्षतादिभिळ् अलंकृत्य ।
श्रीबीजं विलिख्य । षट्कोण पद्मं विलिख्य ।

(कलशवन्नु स्पर्शिसि ई कॆळगिन मंत्रवन्नु हेळबेकु)
कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।

कुक्षौतु सागराः सर्वे सप्तद्वीपा वसुंधरा ।
ऋग्वेदो_थ यजुर्वेदः सामवेदो ह्यथर्वणः ॥

अंगैश्च सहितास्सर्वे कलशांबु समाश्रिताः ।

अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा ।
आयांतु देवपूजार्थं अभिषेकार्थमादरात् ॥

गंगे च यमुने चैव गोदावरी सरस्वति ।
नर्मदे सिंधु कावेरि जले_स्मिन् सन्निधिं कुरु ॥

इमं मे गंगे यमुने सरस्वति शुतुद्रिस्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तया_ _र्जीकीये शृणुह्या सुषोमया ॥

कलशदेवताभ्यो नमः गंध पुष्पाक्षतानि समर्पयामि ॥

निर्विषीकरणार्थं ताक्ष्यमुद्रां प्रदर्शयामि । अमृतीकरणार्थं धेनुमुद्रां प्रदर्शयामि ।
पवित्रीकरणार्थं शंखमुद्रां प्रदर्शयामि । संरक्षणार्थं चक्रमुद्रां प्रदर्शयामि ।
दिग्बंधनार्थं गदामुद्रां प्रदर्शयामि । जलशोधनार्थं पद्ममुद्रां प्रदर्शयामि ।
ओं नमो नारायणायेति मूलमंत्रं अष्टवारं जपित्वा ।

(कलशक्के ताक्ष्यादि मुद्रेगळन्नु दर्शिसि, नारायणाष्टाक्षरदिंद
८ बारि कलशवन्नु अभिमंत्रण माडि, कलशदेवताराधन माडबेकु – ई कॆळगिन
मंत्रगळिंद

एकपंचाशजद्वर्णानां चतुर्विंशतिमूर्तयः । आत्माद्या वासुदेवाद्या विश्वाद्या मत्सकच्छपौ ।
कोलोनृसिंहः स वटुर्जामदग्न्यरघूद्वहौ । वासिष्टयादवौ कृष्णावात्रेयौ बुद्धकल्किनौ ।
शिंशुमारश्चेति शतं कलाः कलशदेवताः । एताभिः सहितां मूलमूर्तिं कुंभोदके सुधी :।
कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलं । योग्यतां पापहानिं च पुन्यवृद्धिं च
साधयेत् । सर्वतीर्थमयो यस्मात्सर्वक्षेत्रमयो यतः । अतो हरिप्रियो_ सि त्वं पूर्णकुंभ
नमो_स्तु ते ।

कलशदेवतांतर्यामि भारतीरमणमुख्यप्राणांतर्गत श्रीलक्ष्मीनारायणाय नमः,
ध्यानावाहनादिषोडशोपचारपूजां समर्पयामि ।

कलशद नीरन्नु "ओं नमो नारायणाय ओं" ऍंब मंत्रदिंद ८ बारि अभिमंत्रिसि,
आ नीरन्नु ऍडगैयल्लि हिडिदुकॊंडु, बिडिहूवॊंदन्नु हिडिदुकॊंडु,
आ नीरन्नु पूजासामग्रिगळिगॆल्ला प्रोक्षिसि, तनगू प्रोक्षिसिकॊळ्ळबेकु.

प्रोक्षिसिकॊळ्ळुवाग "अपवित्रः पवित्रो वा सर्वावस्थां गतो_पि वा ।
यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः। हेळबेकु.

पीठपूजा ।
पीठमध्ये परदेवतायै श्रीलक्ष्मीनारायणाय नमः ।
विष्णोरासनभूताय दिव्यरत्नमयाय च । प्रधान पुरुषेशाय महापीठाय ते नमः ।

देवस्य वामभागे गुरवे वायवे नमः । दक्षिणे सर्वदेवताभ्यो ब्रह्मरुद्रादिभ्यो नमः ।
पुनर्वामे सनकादि सर्वगुरुभ्यो नमः । आग्नेये गं गरुडाय नमः ।
नैरुत्यां व्यां वेदव्यासाय नमः । वायव्ये दुं दुर्गायै नमः ।
ईशान्ये सं सरस्वत्यै नमः ।

एताः पीठपाददेवताः ।

तस्याग्रे सहस्रफणामंडलमंडिताय कुंडलाकृति स्वरूपाय हरेर्योगपीठ स्वरूपाय
श्रीमदनंताय नमः । पीठपूजां समर्पयामि।

(पीठक्के मंत्राक्षतॆ मत्तु बिडिहूवुगळन्नु हाकबेकु)

**॥ प्राणप्रतिष्ठाविधिः ॥**

अस्य श्री प्राणप्रतिष्टा मंत्रस्य ब्रह्मा – विष्णु – महेश्वराः ऋषयः । ऋग्यजु सामार्थवाणि छंदांसि । क्रिया मयवपुः प्राणाख्या देवता । आं बीजं । ह्रीं शक्तिः । क्रौं कीलकं । अस्यां मृन्निर्मित गणपति प्रतिमामां प्राण प्रतिष्टापने विनियोगः ।

ओं ह्रां अंगुष्टाभ्यां नमः । ओं ह्रीं तर्जनीभ्यां नमः । ओं ह्रूं मध्यमाभ्यां नमः । ओं ह्रैं अनामिकाभ्यां नमः । ओं ह्रौं कनिष्टिकाभ्यां नमः । ओं ह्रः करतल करपृष्टाभ्यां नमः ।

ओं ह्रीं शिरसे स्वाहा । ओं ह्रूं शिखायै वौषट् । ओं ह्रैं कवचाय हुं ।

ओं ह्रौं नेत्राभ्यां वौषट् । ओं ह्रः अस्त्राय फट् । ओं भूर्भुवस्सुवरो इति दिग्बंधः ।

**ध्यानं** – रक्तांबोधिस्थपोतोल्लसदरुण सरोजाधिरूढाकराब्जैः पाशं कोदंडमिक्षूद्भवमलिगणप्यंकुशं पंचबाणान् । ब्रिभ्राणासृक्कपालं त्रिनयनविलसत् पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

ओं आं ह्रीं क्रों यं रं वं श सं हं क्षं हंसस्सोहं ।

अस्या मूर्तौ प्राणाः तिष्ठंतु । अस्यां मूर्तौ जीव इह स्थितः ।

अस्यां मूःर्तौ सर्वेंद्रियाणि श्रोत्र – त्वक् – चक्षु – हिह्वा – घ्राण – वाक् – पाणि – पाद – पायूपस्थानि इहैव अगत्य सुखं चिरं तिष्टंतु स्वाह ।

अधोमुखं हृत्कमलं तोरणोद्धरणं चरेत् । विकास्य ज्ञानरविणा कर्णिकास्थं परं विभुं । हृदयस्था हरेर्मूर्तिः जीवो यत्पतिबिंबकः । यद्वशे वर्तते जीवः सा तु जीवकला स्मृता । जीवांतर्यामितो विष्णुः आत्मा नाम प्रकीर्तितः । तेजस्सारमयीं दिव्यां प्रतिमां प्रतिमागताम् । ध्यात्वा प्राणाधिपं तत्र प्रतिमारूपिणं प्रभुं । तन्मध्ये रमया सार्धमासीनं क्षीरनीरवत् । प्रतिमारूपिणं सम्यग्ध्यात्वैवावाहयेत्सुधीः ॥

आत्मादेवानां  भुवनस्य गर्भो यथावशं चरति देव एषः ।

घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ।

एह्येहि मम हृत्पद्मस्थित श्रीपुरुषोत्तम । आवाहयामि पीठे त्वां प्रतिमायां जगत्पते ।

इति संप्रार्थ्य देवेशं षण्मुद्रांश्च प्रदर्शयेत् ।

(नम्म हृदयकमलदल्लिरुव श्रीहरियन्नु ऐदुरिगिरुव मूर्तियल्लि चिंतिसि, कलश प्रतिमॆगळ मेलॆ आवाहिसबेकु)

ओं आवाहितो भव ।स्थापितो भव । सन्निहितो भव । अवकुंठितो भव । सुप्रसन्नो भव । वरदो भव । सान्निध्यं कुरु देवेश सर्वसंपत्करो भव । विभो सकललोकेश देवदेव जगत्पते । त्वां पूजयामि सद्भक्त्या भोगैरर्घ्यादिभिः क्रमात् । यागावसानपर्यंतं अत्र स्थित्वा जगत्पते । भक्तसस्य मम पूजां च गृहीत्वा पाहि मां प्रभो ॥

**गणपति मंत्रः**

ओं अस्य श्री गणपतिमहामंत्रस्य कौशिक ऋषिः । गायत्री छंदः गणपत्यंतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंभरो देवता । महागणपतिमंत्रजपे विनियोगः ।

ओं क्षिप्र हृदयाय नमः (हृदयं स्पृष्ट्वा)
ओं प्रसादाय शिरसे स्वाहा । (शिरं स्पृष्ट्वा)
ओं नमः शिखायै वषट् । (शिखां स्पृष्ट्वा)
ओं क्षिप्र कवचाय हुं । ( भुजवन्नु स्पृष्ट्वा)
ओं नमः प्रसादाय नेत्राभ्यां वषट् ( नेत्रं स्पृष्ट्वा)
ओं नमः अस्त्राय फट् । ( करताडनं कृत्वा)
ओं भूर्भुवः स्वरोमिति दिग्भंधः (सकल दिक्कुगळल्लू दिग्भंदन माडुवुदु)

अथ ध्यानं
रक्तांबरो रक्ततनुः रक्तमाल्यानुलेपनः । लंबोदरो गजमुखः पाशदंतांकुशाभये ।
बिभृद्येयो विघ्नहरः कामदः त्वरया ह्ययम् ।

मंत्र ।
ओं क्षिप्र प्रसादाय नमः ओं । सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंभररूपिणं परमात्मानां आवाहयामि

ओं भू: सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंभरं आवाहयामि ।
ओं भुव: सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबरं आवाहयामि ।
ओं स्व: सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबरं आवाहयामि ॥
ओं भूर्भुवस्व: सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबरं आवाहयामि । (मंत्राक्षतॆयन्नु हाकबेकु)

आवाहितो भव, स्थापितो भव, सन्निहितो भव. सन्निरुद्धो भव,
अवकुंठितो भव, सुप्रसन्नो भव, वरदो भव, शांतो भव । प्रसीद, प्रसीद.

(आवाहनादि आरु मुद्रॆगळन्नु तोरिसि, सिद्धिविनायकनन्नु स्पर्शिसि १५ बारि ओंकारवन्नु पठिसि, ऒंदु बिडिहूविनिंद देवरन्नु स्पर्शिसबेकु)

ध्यानं ।
एकदंतं शूर्पकर्णं गजवक्त्रं चतुर्भुजं । पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकं ।
ध्यायेद्देवं महाकायं तप्तकांचनसन्निभं । दंताक्षमालापरशुपूर्णमोदकहस्तकं ।
मोदकासक्ततुंडाग्रमेकदंतं विनायकं । श्री सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंभराय नम: । ध्यायामि ध्यानं समर्पयामि ।
(मंत्राक्षतॆ अर्पण माडि)

आवाहनं
आवाहयामि विघ्नेश सुरराजार्चितेश्वर । अनाथनाथ सर्वज्ञ पूजार्थं गणनायक ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नम: आवाहयामि ।
(मंत्राक्षतॆ हाकबेकु)

## असनं
विचित्ररत्नरचितं दिव्यास्तरणसंयुतं । स्वर्णसिंहासनं चारु गृहाण सुरपूजित ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नम: आसनं समर्पयामि। (मंत्राक्षतॆ हाकबेकु)

## पाद्यं

सर्वतीर्थसमुद्भूतं पाद्यं गंधादिसंयुतं । विघ्नराज गृहाणेदं भगवन् भक्तवत्सल । सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः । पाद्यं समर्पयामि। (देवर पादद मेलॆ जलबिंदुवन्नु हाकि उळिद नीरन्नु अर्घ्य पात्रॆगॆ हाकबेकु)

## अर्घ्यं

अर्घ्यं च फलसंयुक्तं गंधपुष्पाक्षतैयुतं गणाध्यक्ष नमस्ते_स्तु गृहाण करुणानिधे । सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः । अर्घ्यं समर्पयामि । (देवर मुंदॆ मंत्राक्षतॆ + स्वल्प नीरन्नु हाकबेकु)

## आचमनं

विनायक नमस्तुभ्यं त्रिदशैरभिवंदित । गृहाणाचमनं देव तुभ्यं दत्तं मया प्रभो । सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः आचमनं समर्पयामि। (उद्धरणॆयिंद नीरन्नु देवरिगॆ तोरिसि, अर्घ्यपात्रॆगॆ हाकबेकु)

## मधुपर्कं –

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः मधुपर्कं समर्पयामि ।

## पंचामृतस्नानं

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः पंचामृतस्नानं समर्पयामि ।

## शुद्धोदकस्नानं –

गंधादिसर्वतीर्थेभ्यः आहृतैरमलैर्जलैः । स्नानं कुरुष्व भगवन् उमापुत्रं नमो_स्तु ते । सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः शुद्धोदकस्नानं समर्पयामि । (कलशद नीरन्नु हूविनिंद अर्पिसबेकु)

शुद्धोदकस्नानानंतरं आचमनीयं समर्पयामि
(देवरिगॆ नीरु तोरिसि, अर्घ्यपात्रॆगॆ बिडबेकु)

## वस्त्रयुग्मं

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः वस्त्रयुग्मं समर्पयामि । (गॆज्जॆ वस्त्र अर्पिसबेकु)

## यज्ञोपवीतम् –

राजतं ब्रह्मसूत्रं च कांचनं चोत्तरीयकं ।
गृहाण चारु सर्वज्ञ भक्ताभीष्टप्रदायकं ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः । यज्ञोपवीतं समर्पयामि । (यज्ञोपवीतवन्नु समर्पिसबेकु)

## सिंधूरं –

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः सिंधूरं समर्पयामि।

## आभरणं –

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः नानारत्नमयानि आभरणानि समर्पयामि ।
(आभरणगळिल्लदिद्दरॆ हूवु–मंत्राक्षतॆयन्नु समर्पिसबहुदु).

## गंध –

कस्तूरीचंदनं चैव कुंकुमेन समन्वितम् । विलेपनं सुरश्रेष्ठं चंदनं प्रतिगृह्यताम् ।

गंधद्वारां दुराधर्षां नित्यपुष्पां करीषिणीं । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः गंधं समर्पयामि ।

## अक्षतां

रक्ताक्षतां च देवेश गृहाण द्विरदानन ।
ललाटफलके चंद्रः तस्योपर्यवधार्यताम् ।
सिध्दिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः अक्षतां समर्पयामि । (मंत्राक्षते हाकबेकु)

## पुष्पाणि समर्पण

करवीरैर्जातिसुमैः चंपकैर्बकुलैः शुभैः । शतपत्रैश्च कल्हारैः अर्चयेद्गणनायकम् ।
सिध्दिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः नाना विध परिमळपुष्पाणि समर्पयामि ।

## अथ अंगपूजा –

ओं गणेशाय नमः पादौ पूजयामि । (पादगळु)
ओम् एकदंताय नमः गुल्फौ पूजयामि । (कालिन गंटुगळु)
ओं शूर्पकर्णाय नमः जानुनीं पूजयामि (मंडि)
ओं विघ्नराजाय नमः जंघे पूजयामि (मॊणकालु)
ओं आजुवाहनाय नमः ऊरूम् पूजयामि (तॊडॆ)
ओं हेरंबाय नमः कटिं पूजयामि (सॊंट)
ओं कामारिसूनवे नमः नाभिं पूजयामि (हॊक्कळु)
ओं लंबोदराय नमः उदरं पूजयामि (हॊट्टॆ)
ओं गौरीसुताय नमः स्तनौ पूजयामि (स्तन)
ओं गणनायकाय नमः हृदयं पूजयामि (ऎदॆ)
ओं स्थूलकंठाय नमः कंठं पूजयामि (कंठ)
ओं स्कंदाग्रजाय नमः स्कंदौ पूजयामि (भुज)
ओं पाशहस्ताय नमः हस्तौ पूजयामि (हस्त)
ओं गजवक्त्राय नमः वक्त्रं पूजयामि (मुख)
ओं एकदंताय नमः दंतान् पूजयामि (दंतगळु)
ओं विघ्नहंत्रे नमः नेत्रे पूजमामि (कण्णुगळु)

ओं शूर्पकर्णाय नमः कर्णौ पूजयामि (किवि)
ओं स्थूलनासिकाय नामः नासिकां पूजयामि (मूगु)
ओं फालचंद्राय नमः ललाटं पूजयामि (हणे)
ओं सर्वेश्वराय नमः शिरः पूजयामि (तलॆ)
ओं विघ्नेश्वराय नमः सर्वाण्यंगानि पूजयामि (सर्वांगगळु)

## अथ एकविंशतिपत्रपूजा (२१ पत्रगळिंद पूज)

ओं सुमुखाय नमः मालतीपत्रं समर्पयामि ।
ओं गणाधिपाय नमः भृंगराजपत्रं समर्पयामि ।
ओं उमापत्राय नमः बिल्वपत्रं समर्पयामि ।
ओं गजाननाय नमः श्वेतदूर्वापत्रं समर्पयामि
ओं लंबोदराय नमः बदरीपत्रं समर्पयामि
ओं हरसूनवे नमः दत्तूरपत्रं समर्पयामि
ओं गजकर्णकाय नमः हरिनिवेदित तुळसीपत्रं समर्पयामि ।
ओं वक्रतुंडाय नमः शमीपत्रं समर्पयामि।
ओं गुहाग्रजाय नमः अपामार्गपत्रं समर्पयामि ।
ओं एकदंताय नमः बृहतीपत्रं समर्पयामि ।
ओं विकटाय नमः करवीरपत्रं समर्पयामि ।
ओं कपिलाय नमः अर्कपत्रं समर्पयामि ।
ओं गजदंताय नमः अर्जुनपत्रं समर्पयामि ।
ओं विघ्नराजाय नमः विष्णुकांतिपत्रं समर्पयामि ।
ओं वटवे नमः दाडिमपत्रं समर्पयामि ।
ओं सुराग्रजाय नमः देवदारुपत्रं समर्पयामि ।
ओं फालचंद्राय नमः मरुवकपत्रं समर्पयामि ।
ओं हेरंबाय नमः अश्वत्थपत्रं समर्पयामि ।
ओं चतुर्भुजाय नमः जातीपत्रं समर्पयामि ।
ओं विनायकाय नमः केतकीपत्रं समर्पयामि ।
ओं सर्वेश्वराय नमः अगस्तिपत्रं समर्पयामि ।

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः नानाविध पत्राणि समर्पयामि ।

**पुष्पपूजा –**

ओं सुमुखाय नमः शतपत्रपुष्पं समर्पयामि ।
ओं गणाधिपाय नमः पद्मपुष्पं समर्पयामि ।
ओं उमापत्राय नमः कुमुदपुष्पं समर्पयामि ।
ओं गजाननाय नमः नंद्यावर्तपुष्पं समर्पयामि
ओं लंबोदराय नमः चंपकपुष्पं समर्पयामि
ओं हरसूनवे नमः बकुलपुष्पं समर्पयामि
ओं गजकर्णकाय नमः मल्लिकापुष्पं समर्पयामि ।
ओं वक्रतुंडाय नमः जाजीपुष्पं समर्पयामि।
ओं गुहाग्रजाय नमः कर्णिकारपुष्पं समर्पयामि ।
ओं एकदंताय नमः धत्तूरपुष्पं समर्पयामि ।
ओं विकटाय नमः भृंगराजपुष्पं समर्पयामि ।
ओं कपिलाय नमः सेवंतिकापुष्पं समर्पयामि ।
ओं गजदंताय नमः पाटलीपुत्रं समर्पयामि ।
ओं विघ्नराजाय नमः फन्नागपुष्पम् समर्पयामि ।
ओं वटवे नमः दाडिमीपुष्पं समर्पयामि ।
ओं सुराग्रजाय नमः अशोकपुष्पं समर्पयामि ।
ओं फालचंद्राय नमः केतकीपुष्पं समर्पयामि ।
ओं हेरंबाय नमः दासवाळपुश्पम् समर्पयामि ।
ओं चतुर्भुजाय नमः मंदारपुष्पम् समर्पयामि ।
ओं विनायकाय नमः पारिजातपुष्पम् समर्पयामि ।
ओं सर्वेश्वराय नमः अर्कपुष्पम् समर्पयामि ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः नानविध पुष्पाणि समर्पयामि ।

(मेलॆ हेळिद हूवुगळिल्लदिद्दरू परवागिल्ल, आ पुष्फद हॆसरन्नु हेळिकॊंडु निम्मल्लिरुव पुष्पवन्नो अथवा मंत्राक्षतॆयन्नो समर्पिसबेकु)

**धूपः**

दशांगं गुग्गुलं धूपं सुगंधं सुमनोहरम् ।
गृहाण सर्वदेवेश उमापुत्र नमो_स्तुते ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः । धूपमाघ्रापयामि)
(धूपारति अंदरॆ कॆंड + दशांगद पुडि हाकि माडबेकु)

**दीपः**

साज्यं त्रिवर्तिसंयुक्तं वह्निना द्योतितं मया ।
गृहाण मंगलं दीपमीशपुत्रं नमो_स्तुते ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः । दीपं दर्शयामि ।

**नैवेद्यं–**

देवरिगॆ मॊदलु नैवेद्य माडि, नंतर लक्ष्मी, भारतीरमण मुख्यप्राणरिगॆ नैवेदन माडि, नंतर गणेशनिगॆ निवेदिसबेकु)

सुगंधान् सुकृतांश्चैव मोदकान् घृतपाचिकान् । गृहाण देव नैवेद्यं चणमुद्गैः प्रकल्पितान्।
भक्ष्यं भोज्यं च लेह्यं च चोष्यं पानीयमेव च । गृहाण देव नैवेद्यं मया दत्तं विनायक ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः नैवेद्यं समर्पयामि।

**प्राणाहुति :**

ओं प्राणात्मने श्री अनिरुद्धाय स्वाहा । ओं अपानात्मने श्री प्रद्युम्नाय स्वाहा ।
ओं व्यानात्मने श्री संकर्षणाय स्वाहा । ओं उदानात्मने श्री वासुदेवाय स्वाहा ।
ओं समानात्मने श्री नारायणाय स्वाहा । ओं ब्रह्मणे स्वाहा ।
(ई आरु मंत्रगळिंद तंबिगॆय नीरन्नु आरु बारि अर्घ्यपात्रॆगॆ बिडबेकु )

**पानीयं –**

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः पानीयं समर्पयामि। (जलवन्नु नैवेद्य माडबेकु)

उत्तरापोषणं समर्पयामि । हस्तप्रक्षालनं समर्पयामि ।
मुखप्रक्षालनं समर्पयामि । आचमनं समर्पयामि ।
गंडूषं समर्पयामि ।मुखवस्त्रं समर्पयामि । करवस्त्रं समर्पयामि ।
(प्रति मंत्र जॊतॆगॆ ऒंदॊंदु बारि अर्घ्यवन्नु नीडुवुदु)

**फलानि –**

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः फलानि समर्पयामि ।

**तांबूलं –**

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः तांबूलंसमर्पयामि।

**दक्षिणां –**

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः सुवर्णपुष्पदक्षिणां समर्पयामि ।

**मंगलनीराजनं**

सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः मंगलनीराजनं समर्पयामि

**अथ दूर्वायुग्म पूजा**

१. गणाधिपाय नमः दूर्वायुग्मं समर्पयामि
२. उमापुत्राय नमः  दूर्वायुग्मं समर्पयामि
३. अघनाशनाय नमः दूर्वायुग्मं समर्पयामि
४. विनायकाय नमः  दूर्वायुग्मं समर्पयामि
५. ईशपुत्राय नमः  दूर्वायुग्मं समर्पयामि
६. सर्वसिद्धिप्रदायकाय नमः  दूर्वायुग्मं समर्पयामि
७. एकदंताय नमः  दूर्वायुग्मं समर्पयामि

८. इभवक्त्राय नमः  दूर्वायुग्मं समर्पयामि
९. मूषकवाहनाय नमः  दूर्वायुग्मं समर्पयामि
१०.कुमारगुरवे नमः  दूर्वायुग्मं समर्पयामि
(२१ गरिकॆगळन्नु संग्रहिसि, ई मेल्कंड मंत्रगळिंद प्रति दूर्वक्कू ऎरडॆरडु गरिकॆयन्नु समर्पिसबेकु)

### मंत्रपुष्पांजलि –
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः मंत्रपुष्पांजलिं समर्पयामि ।

### राजोपचार पूजा –
छत्रचामरव्यजनदर्पण नृत्यगीतवाद्यांदोलिकादि
समस्तराजोपचारपूजार्थे अक्षतान् समर्पयामि ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः राजोपचार पूजां समर्पयामि ।

### प्रदक्षिण –
विश्वेश्वर विशालाक्ष सर्वाभीष्ठफलप्रद । प्रदक्षिणं करोमि त्वां सर्वान् कामांश्च देहि मे ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः प्रदक्षिणान् समर्पयामि ।

### नमस्कार –
नमस्ते विघ्नसंहर्ते नमस्ते वांछितप्रद । नमस्ते देवदेवेश नमस्ते गणनायक ।
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः नमस्कारान् समर्पयामि (साष्टांग नमस्कार माडुवुदु)

### वायनदानम् ।
ततो ब्राह्मणपूजां कृत्वा वायनदानं दद्यात् । गणेशः प्रतिगृह्णाति गणेशो वै ददाति च ।
गणेशस्तारको द्वाभ्यां गणेशाय नमो नमः ।
(वायनदानक्कागि बेकाद पदार्थगळु – बाळे ऎलॆ, अर्ध सेरु अक्कि, २ तॆंगिनकायि, ऐदैदु वीळ्यदॆलॆ + अडिकॆ, मत्तु हण्णु, मत्तु दक्षिणॆ)

गृहाणेदं द्विजश्रेष्ठं वायनं दक्षिणान्वितं । फलतंडुलसंयुक्तं दक्षिणाघृतसंयुतं ।
विनायक नमस्तुभ्यं सततं मोदकप्रिय । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।
सफलांस्तु गुडाज्याढ्यान् दास्यामि दशमोदकान् । सदक्षिणां द्विजश्रेष्ठ गणेशः प्रीयतां मम ।
इदं वायनं सदक्षिणाकं सतांबूलं विनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्रीविश्वंभरमूर्ति प्रीतिं कामायमानः तुभ्यमहं संप्रददे । दत्तं न मम न मम ।
प्रतिगृह्यताम्। (ई वाक्यगळन्नु वायन दान कॊडुवनु हेळबेकु)

आग वायनदान तॆगॆदुकॊळ्ळुववनु "प्रतिगृह्णामि" ऎंदु स्वीकरिसुत्तारॆ.

## गणपति विसर्जनॆ –

विसर्जिसुव समयदल्लि
मत्तॆ आचमन, प्राणायाम, संकल्प ऎल्लवन्नू माडि
सिद्धिविनायकांतर्गत भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंबराय नमः श्री विश्वंभरप्रेरणया, श्रीविश्वंभरप्रीत्यर्थं, गणपतिविसर्जांग उत्तरपूजां करिष्ये ।

## पंचोपचार पूज

ओं गणानां त्वां गणपतिं हवामहे कविं कवीनां उपवश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्वत आनः श्रुण्वन्नूतिभिः सीद सादनम् ।

श्री महासिद्धिविनायकाय नमः । गंधं समर्पयामि । पुष्पै पूजयामि ।

सुमखाय नमः । एकदंताय नमः । कपिलाय नमः । गजकर्णकाय नमः ।
लंबोदराय नमः । विकटाय नमः। विघ्नराजाय नमः ।गणाधिपाय नमः ।
धूमकेतवे नमः । गणाध्यक्षाय नमः । फालचंद्राय नमः । गजाननाय नमः ।धूपमाघ्रापयामि । दीपं दर्शयामि । नैवेद्यं समर्पयामि । दक्षिणां समर्पयामि ।
महानीराजनं समर्पयामि । मंत्रपुष्पांजलिं समर्पयामि। प्रदक्षिणनमस्कारान् समर्पयामि ।

अनेन विसर्जनांग उत्तरपूजनेन श्री वरसिद्धिविनायकांतर्गत श्री भारतीरमण मुख्यप्राणांतर्गत श्री विश्वंभर प्रीयतां सुप्रीतो वरदो भवतु । श्री कृष्णार्पणमस्तु ।

## कदलिसुवुदु – उद्वासने –

उत्तिष्ठ ब्रह्मणस्वते देवयंतस्त्वेमहे । उप प्रयंतु मरुत्: सुदानव इंद्र प्राशूर्भवा सचा ।
यांतु देवगणा: सर्वे पूजामादाय मत्कृतां । इष्ठकाम्यार्थसिद्ध्यर्थं पुनरागमनाय च ।

श्री सिद्धिविनायकाय नम । यथा स्थानमुद्वासयामि ।
गणपतियन्नु बावियल्लो, नदियल्लो, कॆरॆयल्लो, समुद्रदल्लो विसर्जिसबेकु.

श्रीकृष्णार्पणमस्तु